# Shri Akhilandanayika Dandaka

# શ્રીઅખિલાણ્ડનાયિકાદણ્ડકઃ

## Document Information

Text title : Shri Akhilandanayika Dandaka 08 13

File name : akhilANDanAyikAdaNDakaH.itx

Category : devii, devI, daNDaka

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-13

Latest update : August 15, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# શ્રીઅખિલાણ્ડનાયિકાદણ્ડકઃ

કદમ્બતરુમઞ્જરીકલિતકર્ણપૂરોજ્જ્વલં
 કલક્વણવિપઞ્ચિકાકલનદત્તકોત્સવમ્ ।
કરસ્ફુરિતશારિકં કઠિનપીનતુઙ્ગસ્તનં
 જગત્ત્રિતયમઙ્ગલં જયતિ મન્મનોમન્દિરે ॥ ૧॥

જય જય જગદેકમાતઃ શિવે દેવિ
જમ્બૂપતીશાનહૃન્મોદકૃન્મારસઞ્જીવનોદ્દામ-
શોભાભિરામાખિલાઙ્ગોજ્જ્વલે
ચમ્પકાશોકપુન્નાગસાલાસનશ્રીફલોદુમ્બરાશ્વત્થ-
જમ્બૂલસચ્ચન્દનાદ્યુર્વરાજાતરાજીનિરસ્તારુણાભાપદસ્વીયવેલાસમુદ્ભાસિ-
સહ્યાત્મજાપૂરયોર્મધ્યગે
વારિજાતાવલીગર્ભનિર્યત્નનિર્યન્મધુસ્વાદહૃષ્યદ્-
દ્વિરેફાઙ્ગનાચારુસઙ્ગીત-
વન્મઞ્જુશાખાસુડોલાવિહારપ્રિયસ્વપ્રિયાયુક્પ્રિયસ્વાનવન્ચા-
પ્રિયસ્વાદુકેકાલસત્કેકિષણ્ડાકુલે,
ચણ્ડભાનુદ્વિષચ્ચણ્ડરામાબ્જભૂચન્દ્રકુમ્ભોદ્ભવશ્રીમદિન્દ્રાગ્નિજમ્બૂમહા-
તીર્થરાજાવલીતીરભૂમલ્લિકાયૂથિકામાલતીપૂર્વવીરુત્સમુદ્ભૂતપુષ્પોત્ક(૨)-
સ્મેરગન્ધાભિરામાતિબાલાનિલસ્વૈરસઞ્ચારસઞ્જાતસમ્મોદદિવ્યાઙ્ગનાલીલસદ્
ગોપુરાલઙ્કૃતે,
સિદ્ધવેષસ્ફુરદ્ભૂતિનિદાયીશ્વરસ્વાન્તસન્તોષકૃત્સાલવર્યાવૃતે,
સન્તતં દન્તિકાન્તારદેશે કૃતાશે દયાશેવધૌ શેરધીશેડિતે,
વેધસા વૈદિકૈરાગમૈર્બોધિતૈરર્ચનાસત્પથૈરદ્ભુતૈઃ પૂજિતે,
ચારુજમ્બૂતરોર્મૂલદેશોલ્લસદ્રત્નગેહાન્તરાલઙ્ક્રિયાકારણે, દન્તિના
લૂતયા ચારુસંસેવિતે, નીરલિઙ્ગાકૃતૌ દેવદેવે હરે લોકરક્ષાકૃતે,
તત્સપર્યાં વિધાતું ભવાનિ સ્વયંવ્યક્તરૂપોજ્જ્વલે, પદ્મયા
હસ્તપઙ્કેરુહાત્તામલસ્ફારમુક્તાફલાલઙ્કૃતચ્છત્રયા

પદ્મભૂકાન્તયા કચ્છપીનિર્ગલદ્દિવ્યગાન્ધારનાદાનુકૂલીભવદ્ગેયયા
નિર્જરાધીશવામભ્રુવા ચિત્તભૂપઙ્કજાક્ષ્યા ચ હસ્તે
ધૃતસ્વર્ણદણ્ડસ્ફુર- ચ્ચામરાભ્યાં સદા
પાર્શ્વયોરુર્વશીમુખ્યદિવ્યાઙ્ગનાભિશ્ચલત્કુન્તલોરોજભારાલસાભિર્મુદા
લાસ્યભેદૈઃ પુરસ્તાચ્ચ સંસેવિતે ॥ ૨॥

નિખિલભુવનરક્ષણે,
સક્ષણોત્ક્ષિપ્તકૌક્ષેયસત્પક્ષિરાજધ્વજાધ્યક્ષિતે સ્વર્ધુરીણાદ્રિ-
સર્વામરાધીશકોટીરકોટીમણીકાન્તિનીરાજિતાઙ્ઘ્રિદ્વયી-
પદ્મકોશોદરોદ્ગીર્ણમુક્તાફલસ્તોમભાસ્વન્નખશ્રેણિકાભાસુરે
શમ્ભુહૃદ્ધીરતાસન્મૃગીયન્ત્રણાકૃન્મનોભૂનિષઙ્ગસ્ફુરજ્જઙ્ઘિકે,
બાલરમ્ભાતિશાયીશવિજ્ઞાતસૌભાગ્યકોરુદ્વયે, દેહશોભાસરો-
ઘૂર્ણદમ્ભોભ્રમભ્રાન્તિકૃન્નાભિગમ્ભીરતાભાસુરે,
નીલરોમાવલીવલ્લરીસત્ફલોરોજભારાનમન્મધ્યદેશે, દયાનદ્ધદેહે,
શુભે,કુમ્ભિકુમ્ભદ્વયીધિક્કિયાદક્ષવક્ષોરુહદ્વન્દ્વ-
સંવર્ધિતેશાનહૃન્મોદભારે,
નતેષ્વેકદા ધર્મકામાર્થમોક્ષપ્રદાનૈકદક્ષૈર્લસત્કલ્પવલ્લીસમૈઃ
બાહુભિઃ પઙ્કજે ભીતિનોદક્ષમામિષ્ટદાં મુદ્રિકાં ચાદધાને,
હરામોદધાનાકૃતે, સિન્ધુરાધીશ્વરારણ્યવાસીશ્વરેણાદરાત્
બદ્ધમાઙ્ગલ્યસૂત્રસ્ફુરત્કમ્બુજિત્કન્ધરારાજિતે,
પાર્વિકસ્વચ્છચન્દ્રાભિરામાનને
નૂત્નસદ્વિદ્રુમારક્તદન્તચ્છદાલઙ્કૃતે કુન્દવૃન્દોલ્લસદ્દન્તપઙ્ક્ત્યા
યુતે, દેહશોભાતમાલાવલીસઞ્ચરઞ્ચન્દ્રિકામન્દહાસાભિરામે
મનોહારિહીરાઙ્કૈર્નિસ્તુલૈર્મૌક્તિકૈઃબદ્ધતાટઙ્કભારાજિતશ્રોત્રયુગ્માન્તરે,
ચારુચામ્પેયગર્વૌઘસર્વઙ્કષોદારમુક્તાફલોદ્ભાસિનાસાયુતે,
મન્દવાતાગતિપ્રેઙ્ખદિન્દીવરદ્વન્દ્વજિલ્લોચને,
મારકોદણ્ડરુગ્ભઙ્ગકૃચ્ચિલ્લિકે, શર્વરીનાથખણ્ડાભિરામાલિકે,
કામજિત્સ્વાન્તવાતાયુષો મોહકૃલ્લેશપાશપ્રભાભાસુરે, મઞ્જુલે,
દેહસૌન્દર્યવિશ્રાન્તિકૃદ્રેખિકાબુદ્ધિદસ્વચ્છશીતાંશુરેખાયુતે
પદ્મરાગાદિભી રત્નવર્યૈઃ
કનદ્દિવ્યકોટીરહારાવલીકઙ્કણૈર્મઞ્જુમાણિક્યસન્નદ્ધશિઞ્જન્મણી-
કાઞ્ચિદામારુણસ્વચ્છચીનાંશુકેનાપિ

શિઞ્જાનમઞ્જીરયુગ્મેન ચાલઙ્કૃતે શોભમાનાકૃતે ॥ ૩॥

અકૃતકવચનાનિ સર્વાણિ યોગીન્દ્રસન્માનસૈઃ સાકમપ્રાપ્ય
યસ્માન્નિવૃત્તાનિ તં તે પરાનન્દમમ્બ, ત્વદીહાબલાદ્યૈ લભન્તે ન તે
કુત્રચિત્ બિભ્યતિ સ્વચ્છબુદ્ધીનમૂન્ન સ્પૃશત્યુગ્રસંસારજં
કર્મજાતં, પુરા યો વિધિં સૃષ્ટવાનદ્ભુતાન્ વેદરાશીનમુષ્મૈ
પુનર્દત્તવાનાત્મબુદ્ધિપ્રકાશં મુમુક્ષુઃ જનો યં સદા સેવતે
યશ્ચ સૂર્યે વિભાત્યાનખાગ્રાત્ પુમાન્ સ્વર્ણવર્ણોજ્જ્વલો યશ્ચ પુંસાં
હૃદાકાશગઃ સચ્ચિદાનન્દરૂપઃ શિવસ્તસ્ય શક્તિસ્ત્વમસ્યુત્તમા
તન્મયી તત્ત્વમસ્યમ્બિકે ત્વદ્ભિયા મારુતો વાતિ સૂર્યાનલૌ
તારકાનાયકોઽપ્યન્ધકારં નિરસ્યાનિશં જઙ્ગમં સ્થાવરં
ચાભિતઃ પાલયન્તે જગત્પન્નગાધીશ્વરોઽપ્યુન્નમત્કન્ધરં ભૂતલં
સાવલમ્બં કરોત્યમ્બરે મેઘપઙ્ક્તિર્જલૈઃ સિઞ્ચતિ ક્ષ્માતલં દેવિ મે
સત્પથેઽત્યન્તસક્તિં કુરુ ત્વં હિ બુદ્ધિપ્રદા સર્વહૃત્પઙ્કજે
સન્નિવિષ્ટા ન ચેદ્દુષ્કૃતં યત્કરોમ્યદ્ય તન્નિષ્કૃતાવેષ
ભારસ્ત્વયિ ॥ ૪॥

સુલલિતપદપઙ્કજે તે સદા યઃ સદા સેવતે તં નરાધીશ્વરાઃ
પ્રાર્થયન્તેતરામમ્બુવાહોપમૈર્બદ્ધઘણ્ટાક્ષણાત્કાર-
સમ્પૂરિતાશાતટૈર્હસ્તિભિઃ
વાતવેગૈર્હયૈરુત્તમૈર્હારકેયૂરરુક્માઙ્ગદૈઃ કુણ્ડલૈર્મણ્ડયન્ત્યસ્ય
ગેહે સદા પદ્મહસ્તા વસત્યેતદીયાનને ગદ્યપદ્યાત્મિકા ભારતી
નૃત્યતિ સ્વૈરમેણીદૃશાં પુષ્પધન્વાયતે સોઽવનૌ
પુત્રપૌત્રાદિભિર્બન્ધુવર્ગૈઃ  સહ ક્રીડતિ સ્વચ્છકીર્ત્યા
જગચ્છાદયત્યમ્બિકે ત્વત્કૃપાવત્કટાક્ષાવલીગોચરસ્યેહ વામુત્ર વા
દુર્લભં કિં ભવેત્ સર્વલોકેશ્વરિ ત્વત્પદં સ્વલ્પવાગલ્પતાચોદિતઃ
સ્તોતુમારબ્ધવાનસ્મ્યથાપ્યાદરાત્ બાલલીલાવચો માતુરત્યન્તમોદં
વિધત્તે શિવે તન્મયા બાલિશેનાનિશં ગુમ્ભિતં ચાપરાધં
ક્ષમસ્વાખિલાણ્ડેશ્વરિ ત્વં સદા પાહિ માં દીનમીશપ્રિયે દેવિ તુભ્યં
નમો દેવિ તુભ્યં નમઃ ॥ ૫॥

શિવસૂર્યદીક્ષિતગુરોર્ભાસ્કરનામ્ના તનૂભુવા રચિતઃ ।
અખિલાણ્ડનાયિકાયાઃ કુર્યાચ્ચિરમેષ દણ્ડકઃ પ્રમદમ્ ॥ ૬॥

ઇતિ શ્રીભાસ્કરકવિકૃતઃ અખિલાણ્ડનાયિકાદણ્ડકઃ સમાપ્તઃ ।

Proofread by Rajesh Thyagarajan

---

*Shri Akhilandanayika Dandaka*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*